# Shri Gajanana Stuti Devakrita

# દેવાકૃતા શ્રીગજાનનસ્તુતિઃ

## Document Information

Text title : Shri Gajanana Stuti Devakrita

File name : gajAnanastutiHdevAkRRitA.itx

Category : ganesha, mudgalapurANa, stuti

Location : doc_ganesha

Proofread by : Yash Khasbage, Preeti Bhandare

Description/comments : mudgalapurANaM chaturthaH khaNDaH | adhyAyaH 48 | 4.48. 22-34||

Latest update : June 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 4, 2024

*sanskritdocuments.org*

# દેવાકૃતા શ્રીગજાનનસ્તુતિઃ

॥ શ્રીગણેશાય નમઃ ॥

દેવા ઊચુઃ ।

ગજાનનાય પૂર્ણાય સાઙ્ખ્યરૂપમયાય તે ।

વિદેહેન ચ સર્વત્ર સંસ્થિતાય નમો નમઃ ॥ ૨૨॥

અમેયાય ચ હેરમ્બાય તે પરશુધારક ।

મૂષકવાહનાયૈવ વિઘ્નેશાય નમો નમઃ ॥ ૨૩॥

અનન્તવિભવાયૈવ પરેષાં પરરૂપિણે ।

ગુહાગ્રજાય દેવાય શિવપુત્રાય તે નમઃ ॥ ૨૪॥

પાર્વતીનન્દનાયૈવ દેવાનાં પાલકાય તે ।

સર્વેષાં પૂજ્યદેહાય ગણેશાય નમો નમઃ ॥ ૨૫॥

સ્વાનન્દવાસિને તુભ્યં શિવસ્ય કુલદૈવત ।

વિષ્ણ્વાદીનાં વિશેષેણ કુલદેવાય તે નમઃ ॥ ૨૬॥

યોગાકારાય સર્વેષાં યોગશાન્તિપ્રદાય ચ ।

બ્રહ્મેશાય નમસ્તુભ્યં બ્રહ્મભૂયપ્રદાય તે ॥ ૨૭॥

સિદ્ધિબુદ્ધિપતે નાથ સિદ્ધિબુદ્ધિપ્રદાયિને ।

માયિને માયિકેભ્યશ્ચ મોહદાય નમો નમઃ ॥ ૨૮॥

લમ્બોદરાય વૈ તુભ્યં સર્વોદરગતાય ચ ।

અમાયિને ચ માયાયા આધારાય નમો નમઃ ॥ ૨૯॥

ગજઃ સર્વસ્ય બીજં યત્તેન ચિહ્નેન વિઘ્નપ ।

યોગિનસ્ત્વાં પ્રજાનન્તિ તદાકારા ભવન્તિ તે ॥ ૩૦॥

તેન ત્વં ગજવક્ત્રશ્ચ કિં સ્તુમસ્ત્વાં ગજાનન ।

વેદાદયો વિકુણ્ઠાશ્ચ શઙ્કરાદ્યાશ્ચ દેવપાઃ ॥ ૩૧॥

શુકાદયશ્ચ શેષાદ્યાઃ સ્તોતું શક્તા ભવન્તિ ન ।

તથાપિ સંસ્તુતોઽસિ ત્વં સ્ફૂર્ત્યા ત્વદ્દર્શનાત્મના ॥ ૩૨॥

ગજાનનં પ્રણેમુસ્તમેવમુક્ત્વા શિવાદયઃ ।

સ તાનુવાચ પ્રીતાત્મા ભક્તિભાવેન તોષિતઃ ॥ ૩૩॥

(ફલશ્રુતિઃ)

શ્રીગજાનન ઉવાચ ।

ભવત્કૃતમિદં સ્તોત્રં મદીયં સર્વદં ભવેત્ ।

પઠતે શ‍ૃણ્વતે દેવા બ્રહ્મભૂયપ્રદાયકમ્ ॥ ૩૪॥

ઇતિ દેવાકૃતા શ્રીગજાનનસ્તુતિઃ સમ્પૂર્ણા ॥

- ॥ મુદ્ગલપુરાણં ચતુર્થઃ ખણ્ડઃ । અધ્યાયઃ ૪૮ । ૪.૪૮। ૨૨-૩૪॥

- .. mudgalapurANaM chaturthaH khaNDaH . adhyAyaH 48 . 4.48. 22-34..

Proofread by Yash Khasbage, Preeti Bhandare

---

*Shri Gajanana Stuti Devakrita*

pdf was typeset on June 4, 2024

Please send corrections to *sanskrit@cheerful.com*